देवस्य पत्नी ङीप् वा। १देवपत्न्यां "देवीनां दक्षिणायने" स्मृतिः। देवसेनाशब्दे उदा० दृश्यम्। २दुर्गायाञ्च धरणी "नमो देव्यै महादेव्यै शिवायै सततं नमः" "देव्या यया ततमिदं जगदात्मशक्त्या" इति च देवीमाहात्म्यम्। "सकृत् कृत्वा महापूजां देवीपादजलं पिबन्। न जातु जननीगर्भे गच्छेदिति विनिश्चयः" देवीभागव० "अपराधं परं कृत्वा देवीभक्तस्य को नरः। सुखं लभेत यद्यपि भवेत् त्राता शिवः स्वयम्" इति देवीभाग० ३कृताभिषेकायां राजमहिष्याम् अमरः। ४मूर्वायां ५पृक्कायां च मेदि०। ६द्विजस्त्रीणामुपाधिभेदे "देव्यन्ताश्च स्त्रियः सर्वा दास्यन्ताः शूद्रयोनयः" कर्मविपाकः। ७आदित्यभक्तायां ८लिङ्गिन्यां ९वन्ध्याकर्कोटक्यां १०शालपर्ण्यां ११महाद्रोण्यां १२पाठायां १३नागरमुस्तायाम्। १४स्पृक्कायां १५हरीतक्याम् १६अतस्यां १७श्यामानामखगे च स्त्री राजनि०। १८रविसंक्रान्तौ तत्कालस्य यथा देवीस्वरूपत्वम् तथा एकादशीत० निरणायि यथा "अतीतानागतो भोगो नाड्यः पञ्चदश स्मृताः। सान्निध्यन्तु भवेत् तत्र ग्रहाणां संक्रमे रवेः। व्यवहारो भवेल्लोके चन्द्रसूर्योपलक्षितः। काले विकल्पते सर्वं ब्रह्माण्डं सचराचरम्। पुण्यपापविभागेन फलं देवी प्रयच्छति। एकाधिककृतं तस्मिन् कोटिकोटिगुणं भवेत्। धर्माद्विवर्द्धते ह्यायूराज्यं पुत्रसुखादि च। अधर्माद्व्याधिशोकादि विषुवायणसन्निधौ। विषुवेषु च यद्दत्तं जप्तं भवति चाक्षयम्। एवं विष्णुपदे चैव षडशीतिमुखेषु च" देवीपु०। "भोगो व्याप्तिः सूक्ष्मसंक्रमणकालसन्निधाने पुण्यतमत्वमिति यावदिति कल्पतरुः। वस्तुतस्तु भुज्यत इति भोगो भोग्यः रविसंक्रमणे अतीतानागतः कालो भोग्यस्तन्निमित्तपुण्यपापजननयोग्य इति यावत्। अतएव पुण्यपापविभागेन फलमित्युपसंहृतम्। स कालः कियानित्याह। नाड्यः पञ्चदशेति उभयतः पञ्चदशदण्डपुण्यत्वं दिवा विष्णुपदीविषयमिति तिथितत्त्वे वक्ष्यते। सान्निध्यमित्यादिना तस्यैव कालस्य स्तुतिः। विकल्पते स्वभावात् प्रच्यवते। देवी संक्रान्तिकालस्वरूपा संक्रान्त्युपक्रमे देवीपुराण एव "समायनर्त्तुमासः पक्षोहश्च क्रमेण तु। स्थूलसूक्ष्मविभागेन देवी सर्वगता विभो!"। इत्यभिधानात् "कलाकाष्ठादिरूपेण परिणामप्रदायिनी" इति मार्कण्डेयपुराणाच्च" रघु०। तत्र कृताभिषेकायां राजमहिष्याम् "स्नातोऽनुलिप्तः सुरभिः स्रग्वी रुचिरभूषणः। स्नातां विशुद्धवसनां गच्छेद्देवीं सुभूषणाम्। न हि देवीगृहं गच्छेदात्मीयात् सन्निवेशनात्। अत्यर्थवल्लभोऽपीह विश्वासं स्त्रीषु न व्रजेत्। देवीगृहगतं भ्राता भद्रसेनममारयत्। मातुःशय्यान्तरे लीनं कारूषञ्चौरसं सुतम्। लाजान् विषेण संयोज्य मधुनेति विलोभितः। देवी तु काशीराजेन्द्रं निजघान रहोगतम्" काम०नीति०।

**देवीकोट** पु० शोणितपुरे बाणासुरपुरे त्रिका०।

**देवीन्धियक** पु० देवीं धिया इत्याद्यप्रतीकशब्दोऽस्ति अत्र अनुवाके अध्याये वा गोषदा० वुन्। देवीं धियेत्याद्यप्रतीकयुक्ते अनुवाके अध्याये च।

**देवीपुराण** न० देव्यामाहात्म्यादियुक्ते उपपुराणभेदे

**देवीभागवत** न० देव्या माहात्म्यवेदकं भागवताख्यं पुराणम्। पुराणभेदे तच्चोपपुराणं कल्पान्तरे महापुराणं वेति उपपुराणशब्दे निर्णीतं तत्र दृश्यम्।

**देवीमाहात्म्य** न० ६त०। मार्कण्डेयपुराणान्तर्गते "सावर्णिः सूर्यतनय इत्यादिके सावर्णिर्भविता मनुरित्यन्ते त्रयोदशाध्यायात्मके ग्रन्थभेदे "श्रोष्यन्ति चैव ये भक्त्या देवीमाहात्म्यमुत्तमम्" मत्स्यपु०।

**देवीरापसक** पु० देवीराप इत्याद्यप्रतीकमस्त्यत्रानुवाके अध्याये वा गोषदा० वुन्। देवीराप इत्याद्यप्रतीकयुक्ते अध्याये अनुवाके च।

**देवीसूक्त** न० देव्याः तद्देवताकं सूक्तं स्तवकसमुदायः। ऋग्वेदे शाकलसंहितायामतिप्रसिद्धे देवीदेवताके १सूक्तभेदे "रात्रिसूक्तं जपेदादौ मध्ये सप्तशतीं जपेत्। प्रान्ते तु जपनीयं वै देवीसूक्तमिति क्रमात्" मरीचिकल्पः। तत्रैव पुरश्चरणप्रकरणे "कृष्णाष्टमीं समारभ्य यावत् कृष्णचतुर्दशीम्। इत्थं कोत्तरमाजाप्यं पूर्वसंपुटितं तत्। एवं देव्या यथा प्रोक्तः पौरश्चरणिकः क्रमः। तदन्ते हवनं कुर्यात् प्रतिश्लोकेन पायसम्। रात्रिसूक्तं प्रति ऋचं तथा देव्याश्च सूक्तकम्। हुत्वान्ते प्रजपेत् स्तोत्रमादौ पूजादिकं मुने!" अत्र गुप्तवतीकारा आहुः। "पूर्वसंपुटितम् पूर्वाभ्यां पूर्वोक्ताभ्यां रात्रिसूक्तदेवीसूक्ताभ्यां संपुटितम्" प्रतिश्लोकेनेति मन्त्रविभागोपलक्षणम् कात्यायन्यादितन्त्रोक्तसप्तशतीविभागग्रन्थस्य हवनादिविधिं प्रति वाक्यशेषत्वेन तेनैव वैधपदार्थनिर्णयावश्यमभावात्। रात्रिसूक्तदेवीसूक्ते च ऋग्वेदे